# Adeshashvadhati

# आदेशाश्वधाटी

## Document Information

Text title : Adeshashvadhati

File name : AdeshAshvadhATI.itx

Category : devii, aShTaka

Location : doc_devii

Author : Durgaprasad DvivedI

Transliterated by : Kamini Viswanathan

Proofread by : Kamini Viswanathan, Rajani Arjun Shankar

Latest update : December 10, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 10, 2020

*sanskritdocuments.org*

# आदेशाश्वधाटी

रक्तामरी-मुकुटमुक्ताफल-प्रकर-पृक्ताङ्घ्रि-पङ्कज-युगां
व्यक्तावदान-सृत-सूक्तामृताकलन-सक्तामसीम-सुषमाम् ।
युक्तागम-प्रथन-शक्तात्मवाद-परिषिक्ताणिमादि-लतिकां
भक्ताश्रयां श्रय विविक्तात्मना घनघृणाक्तामगेन्द्र-तनयाम् ॥ १॥

आद्यामुदग्र-गुण-हृद्याभवन्निगम-पद्यावरूढ-सुलभां
गद्यावली-वलित-पद्यावभास-भर-विद्या-प्रदान-कुशलाम् ।
विद्याधरी-विहित-पाद्यादिकां, भृशमविद्यावसादन-कृते
हृद्याशु धेहि निरवद्याकृतिं मननेद्यां महेशमहिलाम् ॥ २॥

हेला-लुलत्सुरभि-दोलाधिक-क्रमण-खेलावशीर्ण-घटना-
लोलालक-ग्रथित-माला-गलत्कुसुम-जालावभासित-तनुम् ।
लीलाश्रयां, श्रवण-मूलावतंसित-रसालाभिराम-कलिकां
कालावधीरण-करालाकृतिं, कलय शूलायुध-प्रणयिनीम् ॥ ३॥

खेदातुरः किमिति भेदाकुले, निगम-वादान्तरे परिचिति-
क्षोदाय ताम्यसि वृथादाय भक्तिमय-मोदामृतैक-सरितम् ।
पादावनी-विवृति-वेदावलीस्तवन-नादामुदित्वर-विप-
च्छादापहामचलमादायिनीं भज विषादात्ययाय जननीम् ॥ ४॥

एकामपि त्रिगुण-सेकाश्रयात्पुनरनेकाभिधामुपगतां
पङ्कापनोद-गत-तङ्काभिषङ्ग-मुनि-शङ्का-निरास-कुशलाम् ।
अङ्कापवर्जित-शशाङ्काभिराम-रुचि-सङ्काश-वक्त्र-कमलां
मूकानपि प्रचुर-वाकानहो विदधतीं कालिकां स्मर मनः ॥ ५॥

वामां गते, प्रकृतिरामां स्मिते, चटुलदामाञ्चलां कुचतटे
श्यामां वयस्यमितभामां वपुष्युदितकामां मृगाङ्क-मुकुटे ।
मीमांसिकां, दुरित-सीमान्तिकां बहल-भीमां भयापहरणे
नामाङ्कितां, द्रुतमुमां मातरं, जप निकामांहसां निहतये ॥ ६॥

सापायकांस्तिमिरकूपानिवाशु वसुधापान् भुजङ्ग-सुहृदो
हापास्य मूढ ! बहुजापावसक्त-मुहुरापाद्य वन्द्यसरणिम् ।
तापापहां, द्विषदकूपार-शोषणकरीं, पालिनीं त्रिजगतां
पापाहितां,भृशदुरापामयोगिभिरुमां पावनीं परिचर ॥ ७॥

स्फारीभवत्कृति-सुधारीतिदां, भविकपारीमुदर्करचना-
कारीश्वरीं, कुमति-वारीमृषि-प्रकर-भूरीडितां, भगवतीम् ।
चारीविलास-परिचारी भवद्गगनचारी हितार्पण-चणां
मारीभिदे गिरिशनारीममूं प्रणम, पारीन्द्रपृष्ठनिलयाम् ॥ ८॥

ज्ञानेन जातेऽप्यपराधजाते विलोकयन्ती करुणार्द्र-दृष्ट्या ।
अपूर्व-कारुण्यकलां वहन्ती, सा हन्तु मन्तून् जननी हसन्ती ॥ ९॥

इति श्रीदुर्गाप्रसादद्विवेदीविरचिता आदेशाश्वधाटी समाप्ता ॥

Encoded by Kamini Viswanathan

Proofread by Kamini Viswanathan, Rajani Arjun Shankar

*Adeshashvadhati*

pdf was typeset on December 10, 2020

Please send corrections to *sanskrit@cheerful.com*